कर्नाटकप्रशासनम्

# संस्कृतरश्मिः - ३

## तृतीयभाषा - संस्कृतम्

## अष्टमी कक्ष्या

(Revised)

## द्वितीयः भागः

**8**

@KTBS
NOT TO BE REPUBLISHED

# SAMSKRITHA RASHMI-3

**EIGHTH STANDARD**

**THIRD LANGUAGE - SANSKRIT**

**PART-2**

**KARNATAKA TEXTBOOK SOCIETY (R)**
**6th Cross, Malleshwaram, Bengaluru-560 003.**

# पाठानुक्रमणिका

K1W6L6


| क्र.सं. | पाठः | विषयः | पृष्ठसंख्या |
|---|---|---|---|
| ०१. | प्रथमः पाठः | आदर्शः अमात्यः | १ |
| ०२. | द्वितीयः पाठः | क्रियापदम् | ५ |
| ०३. | तृतीयः पाठः | सुभाषितानि | १० |
| ०४. | चतुर्थः पाठः | समासः | १५ |
| ०५. | पञ्चमः पाठः | पुरुषोत्तमः | १९ |
| ०६. | षष्ठः पाठः | नामपदम् | २६ |
| ०७. | सप्तमः पाठः | बुद्धिः सङ्गानुसारिणी | ३२ |
| ०८. | अष्टमः पाठः | धीरः गुरुभक्तः | ४४ |
| ०९. | नवमः पाठः | अनुवादः | ४९ |
| १०. | दशमः पाठः | प्रबन्धाः | ५१ |

| | पूरकपाठः | |
|---|---|---|
| ११. | त्यागाज्जगति पूज्यन्ते | ५२ |
| | **परिशिष्टम्** | |
| १२. | चित्रकथा | ५४ |
| १३. | गद्यावगाहनम् | ५६ |
| १४. | पदकोषः | ५७ |
| १५. | आकरग्रन्थाः | ६० |


©KTBS NOT TO BE REPUBLISHED

# पाठयोजना

| मासाः | पाठाः |
|---|---|
| अक्टोबर् | आदर्शः अमात्यः। नामपदम् |
| नवेम्बर् | क्रियापदम् । सुभाषितानि। |
| डिसेम्बर् | समासः। पुरुषोत्तमः। बुद्धिः सङ्ग्गानुसारिणी। |
| जनवरि | धीरः गुरुभक्तः। प्रबन्धः। |
| फेब्रवरि | चित्रकथा । गद्यावगाहनम्। त्यागाज्जगति पूज्यन्ते। |
| मार्च् | पुनरावर्तनम् |

@KTBS
NOT TO BE REPUBLISHED

# मधुराष्टकम्

अधरं मधुरं वदनं मधुरं
नयनं मधुरं हसितं मधुरं ।
हृदयं मधुरं गमनं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।१।।

वचनं मधुरं चरितं मधुरं
वसनं मधुरं वलितं मधुरं।
चलितं मधुरं भ्रमितं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।२।।

वेणुर्मधुरो रेणुर्मधुरः
पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।३।।

गीतं मधुरं पीतं मधुरं
भुक्तं मधुरं सुप्तं मधुरं ।
रूपं मधुरं तिलकं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।४।।

करणं मधुरं चरणं मधुरं
हरणं मधुरं स्मरणं मधुरं।
वमितं मधुरं शमितं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।५।।

गुञ्जा मधुरा माला मधुरा
यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।६।।

गोपी मधुरा लीला मधुरा
युक्तं मधुरं भुक्तं मधुरं ।
दृष्टं मधुरं शिष्टं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।७।।

गोपा मधुरा गावो मधुरा
यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।८।।

@KTBS NOT TO BE REPUBLISHED

प्रथमः पाठः

# आदर्शः अमात्यः

I5M6Y9

इयं भरतभूमिः पुण्यभूमिः इति प्रसिद्धा। अत्र नैके मुनिपुङ्गवाः दार्शनिकाः च अवर्तन्त। तेषु अन्यतमस्य महापुरुषस्य जीवने प्रवृत्ता एका घटना प्रस्तुता अस्ति।

श्रीमन्! अहं कश्चन वैदेशिकः। प्रवासार्थम् अत्रागतः। देशस्यास्य प्रधानामात्यः सद्गुणसम्पन्नः इति मया श्रुतम्। अतः तं द्रष्टुम् इच्छामि। कृपया तं दर्शयतु इति कञ्चन वृद्धं वैदेशिकः अपृच्छत्। अस्तु! अवश्यं दर्शयिष्यामि। माम् अनुसरतु भवान् इति वदन्तं वृद्धं वैदेशिकः अन्वसरत्।

गङ्गातीरम् प्रस्थितौ तौ नगरभागम् अतिक्रम्य उपवनं प्राविशताम्। तदा वैदेशिकस्य मनसि सन्देहः समुत्पन्नः। एषः मां कुत्र वा नेष्यति? इति। तथापि तूष्णीम् अन्वसरत्। अचिरादेव उभावपि एकस्य कुटीरस्य समीपं गतौ। वृद्धः द्वारम् उद्घाट्य अन्तः प्राविशत्। वैदेशिकस्तु उटजात् बहिरेव अतिष्ठत्। चिरादनागते तस्मिन् वृद्धे भोः! किं मम प्रार्थना विस्मृता? इत्युच्चैः अपृच्छत्।

तदा वृद्धः बहिरागत्य अवदत् - बन्धुवर्य! न मया विस्मृता प्रार्थना। चाणक्योऽहं। अहमेव मौर्यसाम्राज्यस्य प्रधानामात्यः। स्वागतं भवते। कृपया प्रविशतु इति।

वैदेशिकः सकौतुकं प्रविश्य परितः पश्यन् चिन्तयति - कृष्णवर्णः, कृशकायः, शिखाधारी च एषः वृद्धः। कुटीरे तावत् एकत्र जलकलशः, अपरत्र समिधः, काष्ठानि च, अन्यत्र कटः, लेखनसामग्र्यः, ग्रन्थाः च दृश्यन्ते। अयम्

©KTBS NOT TO BE REPUBLISHED

आत्मानम् अमात्यः इति कथयति। परम् अमात्यविभवाः न लक्ष्यन्ते। अहो! किमेतत् आश्चर्यम् इति।

तस्मिन्नेव समये मगधदेशस्य नृपः चन्द्रगुप्तः समागतः। तं दृष्ट्वा अमात्यः अवदत् - वत्स! एषः अस्माकम् अतिथिः। वैदेशिकस्य एतस्य वासादि व्यवस्था कल्प्यताम्। श्वः वार्तालापं करिष्यामः इति।



NOT TO BE REPUBLISHED

परेद्युः सायं चन्द्रगुप्तेन सह वैदेशिकः कुटीरम् आगच्छत्। अमात्यः लेखने निमग्नः आसीत्। तयोरागमनं विज्ञाय पुरतः स्थितं दीपं निर्वाप्य अपरं दीपम् अज्वालयत्। ततः वैदेशिकम् अपृच्छत् - मित्रवर! कुतः आगतः? इति। चीनादेशात् आगतः इति। सः प्रत्यवदत्। अमात्यः पुनरपृच्छत् - अस्माकं देशस्य विषये भवतः अभिप्रायः कः? इति । अत्र सर्वं विचित्रं, विलक्षणं च दृश्यते इत्यकथयत्। किं विचित्रं, किं विलक्षणञ्च दृष्टम् इति सकौतुकम् अमात्यः अपृच्छत्।

“महतः देशस्य प्रधानामात्यस्य जीवनपद्धतिः सरला इत्येतत् विचित्रम्? ज्वलन्तं दीपं निर्वाप्य दीपान्तरज्वालनम् इत्येतत् विलक्षणम्। स्यान्नाम सरलं जीवनम्। दीपान्तरज्वालनं कौतुकं जनयति” इति वैदेशिकः अवदत्।

स्मितवदनः अमात्यः प्राह - “महोदय! किमत्र वैलक्षण्यम्? सर्वं न्यायोचितम्। राजकार्यसमये राजकोशधनेन क्रीतं तैलम् उपयुज्य दीपः प्रज्वाल्यते। स्वीये कार्ये मदीयः दीपः ज्वाल्यते। भवता सह सम्भाषणं स्वीयं कार्यम्” इति।

अहो प्रधानामात्यस्य चाणक्यस्य जीवनविधानम्, सूक्ष्मदर्शिता च। भरतखण्डेऽस्मिन् एतादृशाः महान्तः कियन्तः स्युः धन्येयं पुण्यभूमिः। अत्रागतोऽहम् आत्मानं धन्यं मन्ये। अहो मम सौभाग्यम्। इत्युक्त्वा वैदेशिकः चाणक्यं साष्टाङ्गम् अनमत्।

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत।

१. वैदेशिकः कम् अन्वसरत्?

२. मगधदेशस्य नृपः कः?

३. उटजात् बहिः कः अतिष्ठत्?

४. अमात्यस्य नाम किम्?

### २. रिक्तस्थानं पूरयत।

१. देशस्यास्य प्रधानामात्यः_______________ इति श्रुतम्।

२. अहमेव _______________ साम्राज्यस्य प्रधानामात्यः।

३. प्रधानामात्यस्य जीवनपद्धतिः _______________ ।

४. स्वीये कार्य _______________ दीपः प्रज्वाल्यते।

## ३. समानार्थकपदं लिखत।

१. नगरम्　　२. उपवनम्　　३. सन्देहः　　४. कुटीरः

## ४. विरुद्धार्थकपदं लिखत ।

१. कृष्णः　　२. कृशः　　३. सरलम्　　४. मित्रम्

## ५. निर्देशानुसारम् उत्तरं लिखत ।

१. किं मम प्रार्थना विस्मृता ?

१. कः पाठः ? २. कः अवदत् ? ३. कम् अवदत् ?

२. परम् अमात्यविभवाः न लक्ष्यन्ते

१. कः पाठः ? २. कः अवदत् ? ३. कम् अवदत् ?

*****

@KTBS NOT TO BE REPUBLISHED

## द्वितीयः पाठः

# क्रियापदम्

D2W8S9

क्रियापदस्य तिङन्तम् इत्यपि व्यवहारः अस्ति। तिङ् प्रत्ययान्तं पदं तिङन्तम्। क्रियापदस्य मूलरूपं 'धातुः' इति कथ्यते। धातुः- पठ्, गम् इत्यादयः।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| धातुः | + | विकरणप्रत्ययः | + | तिङ्प्रत्ययः | = | क्रियापदम्। |
| पठ् | + | अ | + | ति | = | पठति। |

संस्कृतभाषायां प्रायः २००० धातवः सन्ति। ते दशगणेषु विभक्ताः सन्ति। क्रियायाः कालानुसारम् अर्थानुसारं च दशलकाराः सन्ति।

**लट् वर्तमाने लेट् वेदे भूते लङ् लुङ् लिटस्तथा।**

**विध्याशिषोश्च लिङ्लोटौ लुट् लृट् लृङ् च भविष्यति।।**

१. लट् ४. लृट् ७. लङ्

२. लिट् ५. लेट् ८. लिङ् (विधि, आशीः)

३. लुट् ६. लोट् ९. लुङ् १०. लृङ्

**धातवः त्रिधा विभक्ताः।**

१. परस्मैपदिनः→ पठति, लिखति इत्यादयः।

२. आत्मनेपदिनः→ लभते, वर्धते इत्यादयः।

३. उभयपदिनः→ याचति / याचते करोति / कुरुते इत्यादयः।

NOT TO BE REPUBLISHED @KTBS

**त्रयः पुरुषाः भवन्ति ।**

१. प्रथमपुरुषः → वदति

२. मध्यमपुरुषः → वदसि

३. उत्तमपुरुषः → वदामि

**त्रीणि वचनानि भवन्ति ।**

१. एकवचनम् - वदति

२. द्विवचनम् - वदतः

३. बहुवचनम् - वदन्ति

## वर्तमानकालः

## पठति - पठ् धातुः लट् लकारः परस्मैपदी ।

NOT TO BE REPUBLISHED ©KTBS

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

## वर्तते - वृतु धातुः लट् लकारः आत्मनेपदी ।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वर्तते | वर्तेते | वर्तन्ते |
| मध्यमपुरुषः | वर्तसे | वर्तेथे | वर्तध्वे |
| उत्तमपुरुषः | वर्ते | वर्तावहे | वर्तामहे |

# भूतकालः

## अपठत् - पठ् धातुः लङ् लकारः परस्मैपदी ।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

## अवर्तत - वृतु धातुः लङ् लकारः आत्मनेपदी ।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवर्तत | अवर्तेताम् | अवर्तन्त |
| मध्यमपुरुषः | अवर्तथाः | अवर्तेथाम् | अवर्तध्वम् |
| उत्तमपुरुषः | अवर्ते | अवर्तावहि | अवर्तामहि |

©KTBS NOT TO BE REPUBLISHED

# भविष्यत्कालः

## पठिष्यति - पठ् धातुः लृट् लकारः परस्मैपदी ।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

## वर्तिष्यते - वृत् धातुः लृट् लकारः आत्मनेपदी ।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वर्तिष्यते | वर्तिष्येते | वर्तिष्यन्ते |
| मध्यमपुरुषः | वर्तिष्यसे | वर्तिष्येथे | वर्तिष्यध्वे |
| उत्तमपुरुषः | वर्तिष्ये | वर्तिष्यावहे | वर्तिष्यामहे |

*********

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत।

१. क्रियापदस्य मूलरूपं किम् ?

२. संस्कृतभाषायां कति धातवः सन्ति ?

३. धातवः कति गणेषु विभक्ताः ?

४. लट् लकारः कं कालं सूचयति ?

५. कति लकाराः सन्ति ?

©KTBS NOT TO BE REPUBLISHED

### २. समुचितपदेन रिक्तस्थानं पूरयत ।

| **क्रियापदम्** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|
| नयामि | लट् | उत्तमपुरुषः | एकवचनम् |
| पिबसि | | | |
| अपठम् | | | |
| मेलिष्यति | | | |
| अगच्छन् | | | |

## अवगच्छत

**भ्वाद्यदादी जुहोत्यादी दिवादिस्स्वादिरेव च ।**

**रुधादिश्च तुदादिश्च तनक्र्यादिचुरादयः ।।**

१. भ्वादिः ६. रुधादिः

२. अदादिः ७. तुदादिः

३. जुहोत्यादिः८. तनादिः

४. दिवादिः ९. क्र्यादिः

५. स्वादिः १०. चुरादिः

### पठतु - पठ् धातुः लोट् लकारः परस्मैपदी ।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठतु/पठतात् | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ/ पठतात् | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |

### वर्तताम् - वृतु धातुः लोट् लकारः आत्मनेपदी ।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वर्तताम् | वर्तेताम् | वर्तन्ताम् |
| मध्यमपुरुषः | वर्तस्व | वर्तेथाम् | वर्तध्वम् |
| उत्तमपुरुषः | वर्तै | वर्तावहै | वर्तामहै |

©KTBS NOT TO BE REPUBLISHED

# तृतीयः पाठः

# सुभाषितानि

## कण्ठपाठः करणीयः

संस्कृतसाहित्ये सुभाषितानां महत्त्वपूर्णं स्थानं वर्तते। 'सुभाषितम्' इत्यस्य अर्थः 'सुष्ठु भाषितम्', 'शोभनं भाषितम्', 'सम्यक् भाषितम्' इति। अस्य सुवचनम्, सदुक्तिः इत्यादीनि नामान्तराणि अपि वर्तन्ते।

सुभाषितरत्नभाण्डागारम्, सूक्तिमुक्तावलिः, सदुक्तिकर्णामृतम् इत्यादयः सुभाषितसङ्ग्रहाः उपलभ्यन्ते। सुभाषितेषु सज्जनदुर्जनगुणाः, ज्ञानस्य महत्त्वं, लौकिकव्यवहारः इत्यादिविषयाः निरूपिताः । सुभाषितानि सन्मार्गं बोधयन्ति।

१. सर्वतीर्थमयी माता सर्वदेवमयः पिता।
मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत् ।।१ ।।

२. सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः ।।२ ।।

३. क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।।३ ।।

४. दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम्।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ।।४ ।।

५. कामधेनुगुणा विद्या सर्वदा फलदायिनी।
प्रवासे मातृसदृशी विद्या गुप्तं धनं स्मृतम् ।।५ ।।

*****

Z5R4Z5
NOT TO BE REPUBLISHED © KTBS

## अन्वयार्थः

१) **सर्वतीर्थमयी** = सर्वतीर्थवती, **माता** = जननी, अम्बा, **सर्वदेवमयः** = सर्वदेवसमानः, **पिता** = जनकः, **तस्मात्** = अतः, **मातरं पितरं च** = जननीं जनकं च, **सर्वयत्नेन** = सर्वप्रयत्नेन, **पूजयेत्** = अर्चयेत् ।

**तात्पर्यम्** - मातापितरौ देवसदृशौ। अतः वयं सर्वे तौ पूज्यभावेन पश्येम।

२) **सत्यम्** = तथ्यम्, **प्रियम्** = हितकरम्, **ब्रूयात्** = कथयेत्, **अप्रियं सत्यं न ब्रूयात्** = सत्यं चेदपि अहितकरं वचनं न वदेत्, **प्रियं च अनृतं** = हितकरं चेदपि असत्यम्, **न ब्रूयात्** = न वदेत्, **एषः सनातनः धर्मः** = प्रचीनपरंपरा ।

**तात्पर्यम्** - सदा सत्यं कथयेत् प्रियं च कथयेत् सत्यं चेदपि अप्रियं न कथयेत् प्रियं चेदपि असत्यं न वदेत् एषः सनातनः धर्मः।

३. **यस्य** = यस्य मानवस्य, **करे** = हस्ते, **क्षमा** = क्षमागुणः, **शस्त्रम्** = आयुधम्, **अस्ति** = विद्यते, **दुर्जनः** = दुष्टजनः, **किं करिष्यति** = किं कर्तुं शक्नोति, **अतृणे** = तृणरहितस्थले, **पतितः** = स्थितः, **वह्निः** = अग्निः, **स्वयमेव** = स्वयम्, **उपशाम्यति** = उपशान्तः भवति।

**तात्पर्यम्** - यथा तृणरहितस्थले पतितः अग्निः स्वयमेव उपशान्तः भवति तथा स्वभावतः सहनशीलं दुर्जनः किमपि कर्तुं न शक्नोति।

४. **मानवः** = मनुष्यः, नरः, **पादम्** = चरणम्, **दृष्टिपूतम्** = सम्यक् अवलोक्य, विचार्य, **न्यसेत्** = स्थापयेत्, **वस्त्रपूतं** = वस्त्रेण संशोध्य, शुद्धीकृत्य, **जलम्** = नीरम्, **पिबेत्**= स्वीकुर्यात्, **सत्यपूताम्** =

© KTBS NOT TO BE REPUBLISHED

सत्यशुद्धाम्, **वाचम्** = वचनम्, **वदेत्** = कथयेत्, **मनःपूतम्** = मनसि सम्यक् विचार्य, सश्रद्धम्, **समाचरेत्** = कार्यं कुर्यात्।

**तात्पर्यम्** - मानवः सम्यक् अवलोक्य चरणं स्थापयेत्। शुद्धीकृतं जलं पिबेत्। सत्यशुद्धां वाचं वदेत्। मनसि सुविचार्य कार्यं कुर्यात्। प्रत्येकमपि कार्यं पवित्रं भवेत्।

५. **कामधेनुगुणाविद्या** = कामधेनुवत् विद्या इष्टार्थं पूरयति,**सर्वदा** = सदा, **फलदायिनी** = फलदात्री, मनःकामनां पूरयति, **प्रवासे** = यात्राप्रसङ्गे, **मातृसदृशी** = जननीसमाना, **गुप्तम्** = प्रच्छन्नम्, **धनम्** = वित्तम्, **स्मृतम्** = विज्ञातम् ।

**तात्पर्यम** -विद्या कामधेनुवत् सदा उत्तमफलदायिनी प्रवासे माता इव रक्षति। एषा विद्या गुप्तं धनम् इति विज्ञातम् ।

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत।

१. सुभाषितस्य नामान्तरं किम् ?

२. सर्वदा फलदायिनी का ?

३. किं न ब्रूयात् ?

४. सर्वतीर्थमयी का ?

५. किं समाचरेत्?

@KTBS NOT TO BE REPUBLISHED

## २. संयोज्य लिखत।

| | अ | आ |
|---|---|---|
| १. | कामधेनुगुणा | माता |
| २. | सनातनः | शस्त्रम् |
| ३. | दृष्टिपूतं | विद्या |
| ४. | क्षमा | धर्मः |
| ५. | सर्वतीर्थमयी | पादं |

## ३. समानार्थकपदं लिखत।

उदाहरणम् - वित्तम् = धनम् ।

१. चक्षुः = .............

२. माता = .............

३. सत्यम् = .............

४. पादः = .............

## ४. विरुद्धार्थकपदं लिखत।

१. स्मृतम् ×

२. सत्यम् ×

३. अप्रियम् ×

४. दुर्जनः ×

@KTBS
NOT TO BE REPUBLISHED

## ५. रिक्तस्थानं पूरयत।

१. दृष्टिपूतं ......................... पादम् ।

२. वस्त्रपूतं ......................... पिबेत् ।

३. मातरं पितरं तस्मात् ............. पूजयेत् ।

४. एष धर्मः........................... ।

## ६. दशभिः वाक्यैः उत्तरं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।

१. विद्याम् अधिकृत्य लिखत।

२. मातापितरौ अधिकृत्य लिखत।

*****

@KTBS NOT TO BE REPUBLISHED

## चतुर्थः पाठः

S2B6C8

# समासः

समासः नाम सङ्क्षेपः। समासे अर्थानुगुणं पदानां संयोजनेन एकं पदम् उत्पद्यते। समासकरणेन अल्पैः पदैः एव बहवः विषयाः संस्कृतभाषया वक्तुं शक्यन्ते। अत्र द्वन्द्वसमासस्य परिचयः क्रियते।

समासे विग्रहवाक्यं समस्तपदम् इति अंशद्वयं भवति। पदानां योजनेन यत् एकं पदम् उत्पद्यते तत् समस्तपदम् इत्युच्यते। समस्तपदस्य अर्थबोधकं वाक्यं विग्रहवाक्यम् इत्युच्यते। तथैव समस्तपदे विग्रहवाक्ये वा आदौ विद्यमानं पदं पूर्वपदम् इति तत्पश्चात् विद्यमानं पदम् उत्तरपदम् इति च कथ्यते।

**समासः**

विग्रहवाक्यम्
वृक्षस्य ↓ पूर्वपदम्
मूलम् ↓ उत्तरपदम्

समस्तपदम् ↓ वृक्षमूलम्

समासे चत्वारः भेदाः सन्ति।

**समासः**

| द्वन्द्वः | तत्पुरुषः | अव्ययीभावः | बहुव्रीहिः |
|---|---|---|---|
| प्रायः | प्रायः | प्रायः | प्रायः |
| उभयपदार्थप्रधानः | उत्तरपदार्थप्रधानः | पूर्वपदार्थप्रधानः | अन्यपदार्थप्रधानः |

@KTBS NOT TO BE REPUBLISHED

## उभयपदार्थप्रधानः द्वन्द्वसमासः

यस्मिन् समासे समासघटितपदानाम् अर्थः पृथक्तया समूहरूपेण वा विवक्षितः सः द्वन्द्वसमासः इति कथ्यते। अत्र प्रकारद्वयम् अस्ति।

द्वन्द्वसमासः

इतरेतरः | समाहारः

०१. **इतरेतरद्वन्द्वः** - द्वन्द्वसमासे समस्तपदे स्थितानाम् अर्थः यदा पृथक्तया विविक्षितः भवति तदा इतरेतरद्वन्द्वः इति कथ्यते। अत्र समस्तपदं द्विवचने बहुवचने वा भवति। तथैव उत्तरपदस्य यल्लिङ्गं तदेव समस्तपदस्यापि भवति।

उदाः- रामश्च कृष्णश्च रामकृष्णौ

रामकृष्णौ शालां गच्छतः।

| विग्रहवाक्यम् | समस्तपदम् | वाक्यम् |
|---|---|---|
| हेमन्तश्च शिशिरश्च वसन्तश्च | हेमन्तशिशिरवसन्ताः | हेमन्तशिशिरवसन्ताः अस्माकं ऋतवः। |
| कुक्कुटश्च मयूरश्च | कुक्कुटमयूरौ | कुक्कुटमयूरौ वने वसतः। |
| पत्रं च पुष्पं च फलं च | पत्रपुष्पफलानि | अहं देवाय पत्रपुष्पफलानि अर्पयामि । |

०२. **समाहारद्वन्द्वः** - समस्तपदे स्थितानां पदानां समूहार्थः यदा विवक्षितः तदा समाहारद्वन्द्वः भवति अत्र समस्तपदं नपुंसकलिङ्गे, एकवचने च भवति।

उदा - पाणी च पदौ च एतेषां समाहारः = पाणिपादम्

अहं पाणिपादं प्रक्षालयामि।

©KTBS NOT TO BE REPUBLISHED

| विग्रहवाक्यम् | समस्तपदम् | वाक्यम् |
| --- | --- | --- |
| पुत्रश्च पौत्रश्च अनयो समाहारः | पुत्रपौत्रम् | गृहस्य यजमानः पुत्रपौत्रं रक्षति । |
| रथिकाश्च अश्वारोहाश्च एतेषां समाहारः | रथिकाश्वारोहम् | रथिकाश्वारोहं सेनायाः अङ्गं भवति । |

## अभ्यासः

### १. एकवाक्येन उत्तरत।

१. समासः नाम किम्?

२. विग्रहवाक्यं नाम किम्?

३. समस्तपदं नाम किम्?

४. द्वन्द्वसमासः कति विधः?

५. द्वन्द्वसमासस्य द्वौ प्रकारौ कौ?

### २. रिक्तस्थानं पूरयत।

१. समासे _______________ इति अंशद्वयं भवति।

२. समासे _______________ भेदाः सन्ति।

३. समासे आदौ विद्यमानं पदं _____________ इति उच्यते।

४. समासे अन्ते विद्यमानं पदं ______________ इति कथ्यते।

४. द्वन्द्वसमासे ______________ इति प्रकारद्वयं अस्ति।

NOT TO BE REPUBLISHED @KTBS

## ३. समस्तपदानां विग्रहवाक्यं विलिख्य समासनाम लिखत।

| क्र.सं. | समस्तपदं | विग्रहवाक्यम् | समासः |
|---|---|---|---|
| १. | कुक्कुटमयूरौ | | |
| २. | पुत्रपौत्रम् | | |
| ३. | पत्रपुष्पफलानि | | |
| ४. | रथिकाश्वारोहम् | | |
| ५. | हेमन्तशिशिरवसन्ताः | | |

*****

@KTBS
NOT TO BE REPUBLISHED

पञ्चमः पाठः

# पुरुषोत्तमः

Y1E8U4

श्रीमद्रामायणम् आदिकाव्यम् इति प्रसिद्धम् । अस्य कर्ता आदिकविः वाल्मीकिः। रामायणे सूर्यवंशस्य कथा चतुर्विंशतिसहस्रश्लोकैः वर्णिता। रामायणस्य बालकाण्डस्य प्रथमसर्गात् केचन श्लोकाः अत्र उद्धृताः सन्ति। एकदा वाल्मीकिः नारदम् अपृच्छत् ''अस्मिन् लोके कोऽपि आदर्शगुणोपेतः पुरुषः वर्तते किम्? तस्य लक्षणानि कानि?'' इति। तदा नारदः इक्ष्वाकुवंशस्य दशरथकौसल्ययोः पुत्रस्य श्रीरामस्य आदर्शगुणान् वर्णयति।

© KTBS NOT TO BE REPUBLISHED

**कविकाव्यपरिचयः**

कविः - वाल्मीकिः।
कालः - पञ्चसहस्रवर्षेभ्यः पूर्वम्।
देशः - भारतदेशः, तमसानदीतीरे ।
कृतिः - रामायणम् ।

**श्लोकाः**

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥१॥
कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥२॥



चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कस्समर्थश्च कश्चैकप्रियदर्शनः ।।३।।

आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ।।४।।

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ।।५।।

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ।।६।।

बुद्धिमान् नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ।।७।।

महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ।।८।।

NOT TO BE REPUBLISHED
©KTBS

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ।।९।।

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ।।१०।।

*****

## अन्वयार्थः

१. **तपस्वी** = मुनिः वाल्मीकिः **तपः** = दैहिकमानसव्रतस्थम् ; **स्वाध्यायनिरतम्** = स्वाध्ययने मग्नम्; **वाग्विदां वरम्** = ज्ञानिनां श्रेष्ठम्; **मुनिपुङ्गवम्** = मुनिश्रेष्ठम् = नारदं ; **परिपप्रच्छ** = पृष्टवान्।

**तात्पर्यम्** - तपस्वी वाल्मिकिमुनिः तपः स्वाध्यायनिरतं मुनिश्रेष्ठं विद्वज्जनेषु उत्तमं नारदं पृष्टवान् ।

२. **साम्प्रतं** = अधुना ; **अस्मिन् लोके** = एतस्मिन् जगति ; **कः गुणवान्** = सद्गुणी ; **वीर्यवान्** = शौर्यवान् ; **धर्मज्ञः** = धर्मविषये पण्डितः ; **कृतज्ञः** = उपकारस्मरणशीलः ; **सत्यवाक्** = सत्यभाषी ; **दृढव्रतः** = निश्चलप्रतिज्ञः ; **अस्ति** = वर्तते ।

**तात्पर्यम्** - एतस्मिन् जगति कः पुरुषः सद्गुणवान्, शौर्यवान्, धर्मवित्, उपकारी, सत्यवचने निष्ठः, निश्चलप्रतिज्ञः च वर्तते ?

३. **कः** = कः पुरुषः ; **चारित्रेण** = सदाचारेण ; **युक्तः** = सम्पन्नः ; **सर्वभूतेषु** = समस्तप्राणिषु ; **हितः** = श्रेयस्साधकः ; **विद्वान्** = पण्डितः; **प्रियदर्शनः** = सुन्दरः अस्ति ।

NOT TO BE REPUBLISHED @KTBS

**तात्पर्यम् -** सदाचारसम्पन्नः, समस्तप्राणिनां हितसाधकः, महान् पण्डितः, सुन्दराङ्गः च कोऽपि पुरुषः अस्ति वा?

४. **कः** = कः पुरुषः ; **आत्मवान्** = स्वात्मनि दृढः, **जितक्रोधः** = क्रोधस्य विजेता ; **द्युतिमान्** = कान्तिमान्, **अनसूयकः** = मात्सर्यरहितः ; संयुगे = युद्धे ; **जातरोषस्य** = जातक्रोधस्य ; देवाः = सुराः अपि; **बिभ्यति** = भीताः भवन्ति।

**तात्पर्यम्** - स्वात्मनि दृढनिश्चयः, जितकोपः, कान्तिमान्, मात्सर्यरहितः, युद्धे कुपितः चेत् देवाः अपि भयभीताः भवन्ति तादृशः नरः कः अस्ति ?

NOT TO BE REPUBLISHED @KTBS

५. **वाल्मीकेः वचः श्रुत्वा** = वाल्मीकेः वचनं श्रुत्वा; **आमन्त्र्य** = विचिन्त्य; **प्रहृष्टः** = सन्तुष्टः ; **त्रिलोकज्ञः** = त्रिलोकविषये अपि ज्ञानवान्ः, नारदः; **श्रूयतां** = श्रुणोतु ; **एतद्** = इमं विषयम् ; **अब्रवीत्** = इति अवदत्।

**तात्पर्यम् -** त्रिलोकसञ्चारी नारदः वाल्मीकेः वचनं श्रुत्वा विचिन्त्य मनसि आनन्दम् अनुभूय एतस्मिन् विषये वदामि श्रुणोतु इति अवदत्।

६. **इक्ष्वाकुवंशप्रभवः** = इक्ष्वाकुवंशे जातः; **नियतात्मा** = जितेन्द्रियः; **महावीर्यः** = महाशक्तिशाली; **द्युतिमान्** = कान्तिमान्; **धृतिमान्** = धैर्यवान्; **वशी** = संयमी; **इति च जनैः** = प्रजाभिः; **श्रुतः** = विदितः; **रामो नाम** = रामः इति पुरुषः अस्ति।

**तात्पर्यम्** - इक्ष्वाकुवंशे जातः जितेन्द्रियः शक्तिमान् कान्तिमान् संयमी इति च जनैः विदितः रामो नाम महापुरुषः अस्ति।

७. **रामः बुद्धिमान्** = बुद्धिशाली ; **नीतिमान्** = नीतिवित् ; **वाग्मी** = चतुरः वक्ता ; **श्रीमान्** = सद्गुणवान् ; **शत्रुनिबर्हणः** = रिपूणां विनाशकः

; **विपुलांसः** = विशालस्कन्दः ; **महाबाहुः** = विशालभुजयुतः; **कम्बुग्रीवः** = शङ्खम् इव त्रिवलीयुक्तः कण्ठः यस्य ; **महाहनुः** = महाकपोलवान्।

**तात्पर्यम्** - श्रीरामः बुद्धिमान् नीतिमान् चतुरवक्ता सद्गुणसम्पन्नः शत्रूणां नाशकः विशालस्कन्धयुक्तः शङ्खम् इव त्रिवलीयुक्तः कण्ठयुतः च अस्ति।

८. **श्रीरामः महोरस्कः** = विशालवक्षस्थलयुक्तः ; **महेष्वासः** = श्रेष्ठः धनुर्धरः; **गूढजत्रुः** = आवृत्तांसः; **अरिन्दमः** = शत्रुदमनकारी ; **आजानुबाहुः** = दीर्घबाहुयुक्तः; **सुशिराः** = सुन्दरमस्तकयुक्तः ; **सुललाटः** = सुन्दरललाटयुक्तः; **सुविक्रमः** = पराक्रमी।

**तात्पर्यम्** - श्रीरामः विशालवक्षस्थलयुक्तः श्रेष्ठधनुर्धरः सुन्दरमस्तकयुक्तः सुन्दर ललाटयुक्तः महापराक्रमशाली शत्रुसंहारे महान् समर्थः च अस्ति।

९. **रामः धर्मज्ञः** = धर्मवित् ; **सत्यसन्धः** = सत्यप्रतिज्ञः; **प्रजानां हिते रतः** = प्रजानां हिते निरतः; **यशस्वी** = कीर्तिमान् ; **ज्ञानसम्पन्नः** = ज्ञानी ; **शुचिः** = पवित्रात्मा ; **वश्यः** = जितेन्द्रियः; **समाधिमान्** = एकाग्रचित्तः।

**तात्पर्यम्** - श्रीरामः धर्मवित् सत्यप्रतिज्ञः स्थिरमनस्कः प्रजाहिते निरतः कीर्तिमान् ज्ञानी पवित्रात्मा जितेन्द्रियः एकाग्रचित्तः च अस्ति।

१०. **श्रीरामः प्रजापतिसमः** = विरिञ्चिसदृशः ; **श्रीमान्** = लक्ष्मीयुतः ; **धाता** = पोषकः ; **रिपुनिषूदनः** = शत्रुविनाशकः ; **जीवलोकस्य** = समस्तप्राणिवर्गस्य **रक्षिता** = रक्षकः ; **धर्मस्य** = सनातन धर्मस्य; **परिरक्षिता** = रक्षणे निरतः ।

**तात्पर्यम्** - श्रीरामः प्रजापतिसमः ऐश्वर्यवान् सर्वेषां पोषकः समस्तप्राणिवर्गस्य रक्षकः शत्रुनाशकः सनातनधर्मस्य रक्षणे सदा निरतः च अस्ति।

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत।

१. आदिकाव्यं किम् ?

२. "रामायणं" किम् इति प्रसिद्धम् ?

३. श्रीरामः कयोः पुत्रः ?

४. लोके कः गुणवान् आसीत् ?

५. श्रीरामः कस्य परिरक्षिता आसीत् ?

### २. रिक्तस्थानं पूरयत।

१. नारदं ............. वाल्मीकिर्मुनिपुङ्गवम्।

२. धर्मज्ञश्च कृतज्ञश्च ............. दृढव्रतः।

३. विपुलांसो महाबाहुः ........................ महाहनुः।

४. रक्षिता ............................ धर्मस्य परिरक्षिता।

### ३. पर्यायपदानि लिखत।

१. तपस्वी २. विद्वान् ३. देवाः ४. प्रजापतिः ५. जनः

### ४. पुंलिङ्ग - स्त्रीलिङ्ग - नपुंसकलिङ्ग - पदानि पृथक् कृत्वा लिखत।

धर्मज्ञः, वचः, साम्प्रतम्, संस्कृतिः, रामायणम्, वाल्मीकिः, नाटकानि।

@KTBS NOT TO BE REPUBLISHED

**५. दशभिः वाक्यैः उत्तरं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।**

१. रामायणविषये लिखत।

२. रामस्य आदर्शगुणान् वर्णयत।

## क्रियाकलापः

**रामस्य आदर्शगुणेषु कतिपयगुणान् लिखत।**




@KTBS
NOT TO BE REPUBLISHED

## षष्ठः पाठः

# नामपदम्

अर्थयुतेन अक्षरसमूहेन पदानि जायन्ते । पदानि कस्यचित् वस्तुनः, जीविनः, गुणविशेषस्य वा अभिधानं कुर्वन्ति। अतः तानि नामपदानि इत्युच्यन्ते । नाम-पदानि एव भाषायाः मूलभूतानि प्रमुखानि घटकानि। भाषाध्ययनस्य आदौ नाम पदानि ज्ञातव्यानि इति धिया तेषां लघुः परिचयः अत्र प्रदत्तः।

नामबोधकानि पदनि नामपदानि। संस्कृते द्विवचनमपि वर्तते। अतः नाम पदानि त्रिषु वचनेषु सप्तसु विभक्तिषु च भवन्ति। एतानि त्रिषु लिङ्गेषु पुनः विभक्तानि। नामपदानां मूलरूपं प्रातिपदिकम् इति कथ्यते। यथा- रामःइत्यस्य राम, रविः इत्यस्य रवि, पिता इत्यस्य पितृ चेत्यादीनि प्रातिपदिकानि। प्रत्येकं प्रातिपदिकस्य विभक्त्यनुसारेण वचनानुसारेण च विभिन्नरूपाणि भवन्ति। तथैव प्रातिपदिकस्य अन्त्ये यदक्षरं भवति तदन्तत्वेन तस्य पदस्य व्यवहारः क्रियते। यथा - राम इत्येतत् अकारान्तं पदम्। रवि इत्येतत् इकारान्तं पदम् इत्यादीनि। कानिचन उदाहरणानि दिङ्मात्राणि इह दर्शितानि।

NOT TO BE REPUBLISHED ©KTBS

### अकारन्तः पुंलिङ्गः "राम" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् | ಕನ್ನಡದಲ್ಲಿ ವಿಭಕ್ತಿ ಪ್ರತ್ಯಯಗಳು | ಅರ್ಥ | Meaning |
|---|---|---|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः | ಉ | ರಾಮನು | Rama |
| द्वितीया | रामम् | रामौ | रामान् | ಅನ್ನು | ರಾಮನನ್ನು | To Rama |
| तृतीया | रामेण | रामाभ्याम् | रामैः | ಇಂದ | ರಾಮನಿಂದ | By/with Rama |

| | | | | | | |
|---|---|---|---|---|---|---|
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः | ಗೆ | ರಾಮನಿಗೆ | For Rama |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः | ದೆಸೆಯಿಂದ | ರಾಮನ ದೆಸೆಯಿಂದ | From Rama |
| षष्ठी | रामस्य | रामयोः | रामाणाम् | ಅ | ರಾಮನ | Of Rama |
| सप्तमी | रामे | रामयोः | रामेषु | ಅಲ್ಲಿ | ರಾಮನಲ್ಲಿ | In/on Rama |
| सं.प्र | हे! राम | हे! रामौ | हे! रामाः | ಎಲೈ | ಎಲೈ ರಾಮನೇ | O! Rama |

एवमेव भानुशम्भुमनुसाधुधात्वादयः उकारान्ताः पुंलिङ्गशब्दाः ज्ञेयाः।

## उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| द्वितीया | धेनुम् | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभिः |
| चतुर्थी | धेन्वै/धेनवे | धेनुभ्याम् | धेनुभ्यः |
| पञ्चमी | धेन्वाः/धेनोः | धेनुभ्याम् | धेनुभ्यः |
| षष्ठी | धेन्वाः/धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम्/धेनौ | धेन्वोः | धेनुषु |
| सम्बोधनम् | हे धेनो! | हे धेनू! | हे धेनवः! |

एवमेव तनुकरेण्वादयः उकारान्ताः स्त्रीलिङ्गशब्दाः ज्ञेयाः।

@KTBS NOT TO BE REPUBLISHED

## उकारान्तः नपुंसकलिङ्गः 'मधु' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधनम् | हे मधो! हे मधु | हे मधुनी! | हे मधूनि! |

एवमेव अम्बुश्मश्रु इत्यादयः उकारान्ताः नपुंसकलिङ्गशब्दाः ज्ञेयाः।

@KTBS NOT TO BE REPUBLISHED

## मकारान्तः त्रिलिङ्गकः 'किम्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| लिङ्गम् | पु / स्त्री / नपुं | पु / स्त्री / नपुं | पु / स्त्री / नपुं |
| प्रथमा | कः / का / किम् | कौ / के / के | के / काः / कानि |
| द्वितीया | कम् / काम् / किम् | कौ / के / के | कान् / काः / कानि |
| तृतीया | केन / कया / केन | काभ्याम् / काभ्याम् / काभ्याम् | कैः / काभिः / कैः |
| चतुर्थी | कस्मै / कस्यै / कस्मै | काभ्याम् / काभ्याम् / काभ्याम् | केभ्यः / काभ्यः / केभ्यः |

| | | | |
|---|---|---|---|
| पञ्चमी | कस्मात्/कस्याः/कस्मात् | काभ्याम्/काभ्याम्/काभ्याम् | केभ्यः/काभ्यः/केभ्य |
| षष्ठी | कस्य/कस्याः/कस्य | कयोः/कयोः/कयोः | केषाम्/कासाम्/केषाम् |
| सप्तमी | कस्मिन्/कस्याम्/कस्मिन् | कयोः/कयोः/कयोः | केषु/कासु/केषु |

## सर्वनाम त्रिलिङ्गकः तकारान्तः 'तत्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| लिङ्गम् | पु/स्त्री/नपुं | पु/स्त्री/नपुं | पु/स्त्री/नपुं |
| प्रथमा | सः/सा/तत् | तौ/ते/ते | ते/ताः/तानि |
| द्वितीया | तम्/ताम्/तत् | तौ/ते/ते | तान्/ताः/तानि |
| तृतीया | तेन/तया/तेन | ताभ्याम्/ताभ्याम्/ताभ्याम् | तैः/ताभिः/तैः |
| चतुर्थी | तस्मै/तस्यै/तस्मै | ताभ्याम्/ताभ्याम्/ताभ्याम् | तेभ्यः/ताभ्यः/तेभ्यः |
| पञ्चमी | तस्मात्/तस्याः/तस्मात् | ताभ्याम्/ताभ्याम्/ताभ्याम् | तेभ्यः/ताभ्यः/तेभ्य |
| षष्ठी | तस्य/तस्याः/तस्य | तयोः/तयोः/तयोः | तेषाम्/तासाम्/तेषाम् |
| सप्तमी | तस्मिन्/तस्याम्/तस्मिन् | तयोः/तयोः/तयोः | तेषु/तासु/तेषु |

एवमेव यत् एतत् शब्दौ भवतः।

@KTBS NOT TO BE REPUBLISHED

## दकारान्तः त्रिषु लिङ्गेषु समानः 'अस्मद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् / मा | अवाम् / नौ | अस्मान् / नः |
| तृतीया | मया | अवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम् / मे | अवाभ्याम् / नौ | अस्मभ्यम् / नः |
| पञ्चमी | मत् | अवाभ्याम् | अस्मत् |
| षष्ठी | मम / मे | आवयोः / नौ | अस्माकम् / नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

## दकारान्तः त्रिषु लिङ्गेषु समानः 'युष्मद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् / त्वा | युवाम् / वाम् | युष्मान् / वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम् / ते | युवाभ्याम् / वाम् | युष्मभ्यम् / वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव / ते | युवयोः / वाम् | युष्माकम् / वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत।

१. नामपदं नाम किम्?

२. नामपदस्य मूलरूपं किम्?

३. रामः इत्यस्य प्रातिपदिकं किम्?

४. धेनु इत्येतत् पदम् कस्मिन् लिङ्गे वर्तते?

### २. इतरवचनरूपाणि लिखत।

१. रामः ____________ ____________

२. धेनवे ____________ ____________

३. कस्य ____________ ____________

४. अहम् ____________ ____________

### ३. लिङ्गविभक्तिवचनानि लिखत।

१. रामे २. तस्यै ३. अस्मासु ४. मधुश्य ५. कयोः

६. ताम्

### ४. चतुर्थं पदं लिखत ।

१. मधु - नपुंसकलिङ्गः : : धेनुः - ____________

२. मया - अस्माभिः : : कया - ____________

३. त्वाम् - द्वितीयाविभक्तिः : : मयि - ____________

५. ताभ्याम् - द्विवचनम् : : तेषु - ____________

@KTBS NOT TO BE REPUBLISHED

सप्तमः पाठः

# बुद्धिः सङ्गानुसारिणी

कश्चित् किरातः शुकशावकद्वयं विक्रेतुं विपणिम् आगच्छति। तदा एकः साधुः अपि तत्र आगच्छति। एकः सौनिकः अपि तत्र आगच्छति।











@KTBS
NOT TO BE REPUBLISHED







@KTBS
NOT TO BE REPUBLISHED

साधोः आश्रमे -







@KTBS NOT TO BE REPUBLISHED







@KTBS NOT TO BE REPUBLISHED







NOT TO BE REPUBLISHED




@KTBS
NOT TO BE REPUBLISHED

**प्रियाः छात्राः। साधुः किम् उत्तरं ददाति ?**

**इति विचारं कुर्मः।**

**अनन्तरं रिक्तस्थानानि उचितपदैः पूरयित्वा कथायाः समाप्तिं कुर्मः।**

@KTBS
NOT TO BE REPUBLISHED









@KTBS
NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

१. एकस्य शुकस्य कियत् मौल्यम्?
२. शुकः सौनिकस्य गृहे कीदृशं कर्म अपश्यत् ?
३. शुकः कस्य गृहे मृदुवचनानि श्रृणोति ?
४. सङ्गानुसारिणी का भवति ?
५. कस्य सहवासः आवश्यकः ?

### २. यथानिर्देशं लिखत ।

१. 'भोः साधो, एकस्य शुकस्य दशरूप्यकाणि' ।
क: पाठ: ? क: वदति ? कं वदति ?
२. 'विश्रान्तिं स्वीकरोतु'।
क: पाठ: ? क: वदति ? कं वदति ?
३. 'सः शुकः हिंस्रं कर्म अपश्यत्'।
क: पाठ: ? क: वदति ? कं वदति ?

### ३. इतरवचनद्वयं लिखत ।

१. .................. .................. रूप्यकाणि
२. शुकस्य .................. ..................
३. आश्रमम् .................. ..................
४. .................. .................. सज्जनानाम्

### ४. एतेषां पदानां समानार्थकपदं पाठात् चित्वा लिखत ।

१. शबरः = .............. २. अन्तिकम् = ..............
३. कार्यम् = .............. ४. साधुः = ..............

©KTBS NOT TO BE REPUBLISHED

**५. एतेषां पदानां विरुद्धार्थकपदं पाठात् चित्वा लिखत ।**

१. दुर्जनः x ........... २. मृदु x ............
३. साधुकर्म x ........... ४. श्रान्तः x ...........

**६. सन्धिपदं विभज्य संयोज्य वा लिखत ।**

१. तत्रैव = ............. + .......................
२. कस्यापि = ............. + .......................
३. अपि + एकम् = ..................................
४. सङ्ग + अनुसारम् = ............................

**७. अनयोः पदयोः विशेषणं विशेष्यं च चित्वा लिखत ।**

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| उदाहरणम् - सुन्दरः बालकः - | सुन्दरः | बालकः |
| १. एकस्य शुकस्य - | | |
| २. श्रान्तः पथिकः - | | |
| ३. मृदूनि वचनानि - | | |
| ४. हिंस्रं कर्म - | | |
| ५. भीतः पथिकः - | | |

@KTBS NOT TO BE REPUBLISHED

*****

**अवधेयांशः**

व्याकरणविशेषः - 'भवद्योगे न मध्यमः' इति सूत्रेण भवत् अथवा भवती इति शब्दस्य योगे क्रियापदं प्रथमपुरुषे एव भवति न तु मध्यमपुरुषे।

उदाहरणम् - भवान् पाठं पठतु। भवती गीतं गायतु।

**सूक्तक्रियापदरूपेण रिक्तस्थानं पूरयत।**

१. भवती मह्यं पुस्तकं .................................... । (दा)
२. भवान् श्लोकं ........................................ ।(लिख्)
३. भवती मया सह ..................................... । (क्रीड्)
४. भवान् पाठं ......................................... । (पठ्)

## क्रियाकलापः

**अधोलिखितं श्लोकं पठित्वा इन्द्रियं सूक्तकर्मणा सह मेलयत।**

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरम्
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं श्रृणु।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन्नमाधोक्षजम् ।।

(श्री कुलशेखर आळ्वार् विरचितं मुकुन्दमालास्तोत्रम्)

१. जिह्वायाः अच्युतकथानां श्रवणम् ........................
२. चेतसः कृष्णावलोकनम् ........................
३. पाणिद्वन्द्वस्य मुकुन्दपादतुलसीघ्राणनम् ........................
४. श्रोत्रद्वयस्य केशवस्य कीर्तनम् ........................
५. लोचनद्वयस्य अधोक्षजनमनम् ........................
६. घ्राणस्य मुररिपोः भजनम् ........................
७. मूर्ध्नः श्रीधरस्य समर्चनम् ........................

*****

© KTBS NOT TO BE REPUBLISHED

अष्टमः पाठः

# धीरः गुरुभक्तः

प्राचीनकाले एकस्मिन् गुरुकुले गुरुभक्ताः धीराः च शिष्याः अधीयानाः आसन्। तादृशेषु आरुणिः अपि अन्यतमः। महाभारते विद्यमानम् आरुण्युपाख्यानम् आरुणेः गुरुभक्तिं धैर्यं च दर्शयति। तदुपाख्यानम् अत्र सङ्गृह्य प्रदत्तम्।



धौम्यो नाम प्रसिद्धः गुरुः आसीत्। तस्याश्रमः नद्याः स्वच्छे सुन्दरे तीरे आसीत्। अनेके छात्राः अध्ययनार्थं तम् आश्रमम् आगच्छन्ति स्म। तेष्वन्यतमः आरुणिः। धौम्यः तेभ्यः अशन-वसति-वस्त्रादिकं दत्वा बोधनकार्यं करोति स्म।

आश्रमे प्रतिदिनं शान्तिपाठपूर्वकं अध्ययनं प्रारभ्यते। सर्वे छात्राः आश्रम

नियमानुसारेण कार्यतत्पराः भवन्ति। क्रीडा योगाभ्यासादि पाठ्येतर विषयेष्वपि आसक्ताः भवन्ति।

एकस्मिन् दिवसे निशीथे महती वृष्टिः अभवत्। विद्युतां प्रखरप्रकाशेन, झञ्झावातेन च साकं घोरं गर्जन्तः मेघाः अवर्षन्।

आश्रमात् अनतिदूरे धौम्यस्य शालिक्षेत्राण्यासन्। तानि च अतिवृष्ट्या जलपूरितान्यासन्। जलप्रवाहेन केदारखण्डं कश्चित् भग्नम्। भग्नात् खण्डात् जलप्रवाहः वेगेन बहिः निर्गतः। सर्वे छात्राः सुप्ताः आसन्। सुप्तः धौम्यः उत्थाय गवाक्षेण बहिः अपश्यत्। महत्या वृष्ट्या सर्वत्र जलप्रवाहः आसीत्। प्रवाहस्य शब्दं श्रुत्वा चिन्तामग्नः गुरुः धौम्यः किंकर्तव्यतामूढः अभवत्। तदानीमेव आरुणिः जागरितः गुरुसमीपं आगच्छत्। गुरुः अवदत् - आरुणे, पश्य बहिः अतिवृष्ट्या केदारखण्डं भग्नम् इव भाति। आश्रमं परितः जलप्रवाहः दृश्यते। किं करोमि? इति। आरुणिरवदत् आचार्य मास्तु चिन्ता। बहिर्गत्वा पश्यामि किं जातम्? इति।



@KTBS NOT TO BE REPUBLISHED

धौम्यस्य आरुणिविषये महान् आदरः आसीत्। यतः सः गुरुसेवां श्रद्धया करोति स्म। अध्ययनेऽपि निपुणः आसीत्।

अथ आरुणिः आश्रमद्वारं उद्घाट्य बहिरगच्छत्। गत्वा च केदारखण्डं भग्नं दृष्ट्वा अचिन्तयत् किं कार्यं इदानीम्? इति। तत्र न इष्टिकाः आसन् न वा शिलाश्च। किञ्चत् विचार्य आरुणिः भग्नस्य केदारखण्डस्य मध्ये अस्वपत्। तेन जलप्रवाहः अवरुद्धः। क्रमेण वृष्टिरपि शान्ता।

प्रभाते सञ्जातेऽपि आरुणिम् अनागतं वीक्ष्य गुरुः सतीर्थ्याश्च सम्भ्रान्ताः अभवन्। सर्वे मिलित्वा आरुणिं अन्वेष्टुं प्रवृत्ताः। यदा ते शालिक्षेत्रस्य समीपम् आगताः तदा केदारखण्डमध्ये शयानम् आरुणिं दृष्ट्वा चकिताः अभवन्। गुरुः सम्भ्रान्तः वत्स आरुणे, वत्स आरुणे इति आह्वयत्। तत् श्रुत्वा आरुणिः केदारखण्डात् उदतिष्ठत्। स च शैत्याधिक्यात् जडः आसीत्।

गुरुः सखायश्च तं मन्दं मन्दम् आश्रमम् अनयन्। औषधोपचारेण च स्वस्थम् अकुर्वन्।

अथ धौम्यः आरुणिम् आलिंग्य, शिरस्याघ्राय आशिषो दत्तवान्। वत्स तव गुरुसेवया अहं सन्तुष्टोऽस्मि। तुभ्यं सर्वे वेदाः स्वयं स्फुरन्तु इति।

गुर्वनुग्रहेण आरुणिः अचिरेणैव कालेन सर्वज्ञोऽभवत्। अनेनैव आरुणिः उद्दालक इति प्रसिद्धः अभवत् । तदुक्तम्-

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।**

*****

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत।**

१. धौम्यस्य आश्रमः कुत्र आसीत्?

२. छात्राः किमर्थं धौम्यस्य आश्रमम् आगच्छन्ति स्म?

३. कया शालिक्षेत्राणी जलपूरितान्यासन्?

४. कस्य अनुग्रहेण आरुणिः सर्वज्ञोऽभवत्?

**२. रिक्तस्थानं पूरयत।**

१. आश्रमात् ....... धौम्यस्य शालिक्षेत्राण्यासन्।

२. आरुणिः जागृतः .... समीपम् आगच्छत्।

३. धौम्यस्य आरुणिविषये महान् ..... आसीत्।

४. क्रमेण .... शान्ता।

**३. समानार्थकपदं लिखत।**

१. वृष्टिः २. गुरुः ३. छात्रः ४. प्रभातः

**४. विरुद्धार्थकपदं लिखत।**

१. जागृतः २. आदरः ३. मन्दं-मन्दम् ४. शैत्यम्

© KTBS NOT TO BE REPUBLISHED

**५. निर्देशानुसारम् उत्तरं लिखत।**

१. आचार्य, मास्तु चिन्ता।

क: पाठः? कः अवदत्? कम् अवदत्?

२. वत्स, तव सेवया अहं सन्तुष्टोऽस्मि।

कः पाठः? कः अवदत्? कम् अवदत्?

**६. सन्धिं विभज्य नाम लिखत।**

१. तेष्वन्यतमः २. शालिक्षेत्राण्यासन्

३. औषधोपचारेण ४. गुर्वनुग्रहेण

**७. दशभिः वाक्यैः उत्तरं मातृभाषया लिखत।**

१. आरूणेः गुरुभक्तिं विवृणुत।

२. धौम्यमहर्षिः कथम् आरूणेः गुरुभक्तिं परीक्षते?

@KTBS NOT TO BE REPUBLISHED

*****

नवमः पाठः

# अनुवादः

B7K5N1

ಈ ಕೆಳಗಿನ ವಾಕ್ಯಗಳನ್ನು ಸಂಸ್ಕೃತ ಭಾಷೆಗೆ ಅನುವಾದಿಸಿರಿ.
Translate the following Sentences into Samskrit.

1. ಹಸುವು ಪೂಜನೀಯವಾಗಿದೆ.ಅದು ನಮಗೆ ಹಾಲನ್ನು ಕೊಡುತ್ತದೆ. ತಾಯಿಯಂತೆ ನಮ್ಮನ್ನು ಪಾಲಿಸುತ್ತದೆ.
   The Cow is a sacred animal. It gives milk to us. It protects us like a mother.
2. ನನ್ನ ಪುಸ್ತಕದ ಹೆಸರು "ಸಂಸ್ಕೃತ ರಶ್ಮಿ". ಇದರಲ್ಲಿ ಒಳ್ಳೆಯ ಕಥೆಗಳಿವೆ. ಮಧುರವಾದ ಪದ್ಯಗಳೂ ಇವೆ.
   The name of my book is 'Samskrita Rashmi'. It contains very good stories and lovely poems also.
3. ದೀಪಾವಳಿ ಹಬ್ಬವನ್ನು ಆಶ್ವಯುಜಮಾಸದಲ್ಲಿ ಆಚರಿಸಲಾಗುತ್ತದೆ. ಬಾಲಕ ಬಾಲಕಿಯರು ನೂತನವಸ್ತ್ರಗಳನ್ನು ಧರಿಸುತ್ತಾರೆ.
   Deepavali festival is celabrated in Aashwayuja month. Boys and girls wear new clothes.
4. ಸಂಸ್ಕೃತ ಭಾಷೆಯು ಅತ್ಯಂತ ಸರಳವೂ, ಸುಲಭವೂ ಮತ್ತು ಮಧುರವೂ ಆಗಿದೆ. ನಾವೆಲ್ಲರೂ ಈ ಭಾಷೆಯನ್ನು ಕಲಿತು ಅಭ್ಯಸಿಸೋಣ.
   Samskrit is very simple, easy and pleasant language. Let us learn and practise this language.

©KTBS NOT TO BE REPUBLISHED

## ಈ ಕೆಳಗಿನ ವಾಕ್ಯಗಳನ್ನು ಕನ್ನಡ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಗೆ ಅನುವಾದಿಸಿರಿ.

## Translate the following Sentences into Kannada or English

१. सर्वेषु धनेषु विद्याधनम् एव उत्तमं धनम् इति मन्यते। विद्या एव अस्मान् सन्मार्गे स्थापयति।

२. वसन्तः ऋतूनां राजा अस्ति। अस्मिन् एव ऋतौ युगारम्भः भवति। सर्वत्र वृक्षाः लताश्च पुष्पिताः भवन्ति। प्रकृतिः अत्यन्तमनोहारिणी भवति।

३. भोः छात्राः! मातापितरौ गुरुं च नमत। सत्प्रजाः भूत्वा भारतस्य अभिवृद्धये प्रयत्नशीलाः भवत।

४. अस्माकं शालायाः छात्राः मृगालयं द्रष्टुं मैसूरु नगरम् अगच्छन्। ते तत्र गजान्, व्याघ्रान्, भल्लूकान्, मयूरान्, सर्पान्, हंसान् च अपश्यन्।

@KTBS NOT TO BE REPUBLISHED

*****

## संस्कृतभाषासम्बन्धीनि जालस्थानानि

- ⇨ www.jnu.ac.in
- ⇨ www.sanskritjagat.com
- ⇨ http://www.speaksanskrit.org
- ⇨ http://sudharma.epapertoday.com
- ⇨ http://www.sanskritvartmanpatram.com
- ⇨ http://www.bookbox.com
- ⇨ http://www.sambhashanasandesha.in
- ⇨ http://www.spokensanskrit.de
- ⇨ http://www.sanskrit.safire.com

दशमः पाठः

# प्रबन्धाः

H4B9Q3

## स्त्रीशिक्षणम्

शिक्षणं तावत् सर्वेषां मानवानां मूलभूतः अधिकारः। पुरुषाः यथा उन्नताध्ययनं कुर्वन्ति तथैव महिलाः अपि अध्येतुम् अर्हन्ति। प्राचीनकाले अपि स्त्रियः विशेषाध्यायनं कुर्वन्ति स्म। वेदकाले गार्गी, मैत्रेयी, वाचक्नवी इत्याद्याः स्त्रियः स्वज्ञानवैभवेन विद्वत्सभासु विराजन्ते स्म। एतत् सर्वमपि शिक्षणस्यैव प्रभावः। सुशिक्षिता स्त्री अन्यान् अपि शिक्षणार्थं प्रेरयति। कालान्तरे वैदेशिकैः अस्माकं देशः आक्रान्तः। तदा स्त्रीणां शिक्षणं स्थगितप्रायं सञ्जातम्।

अधुना सर्वत्र महिलानां शिक्षणोत्साहं पश्यामः। विभिन्नक्षेत्रेषु अपि सा स्वसामर्थ्यं प्रदर्शयति। सा विमानचालने, धूमशकटचालने, आरक्षकक्षेत्रे, तन्त्रज्ञाने, राजनीतिक्षेत्रे अपि पदं स्थापितवती। सर्वकारोऽपि महिलाभ्यः निश्शुल्कविद्याभ्यासः, उद्योगावकाशे आरक्षणम् इत्यादिरूपेण प्रोत्साहं ददाति। यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः इत्युक्तिम् अनुसृत्य सर्वाः महिलाः योग्यशिक्षणं संस्कारं च प्राप्य भारतस्य गरिमाणं वर्धयेयुः।

© KTBS NOT TO BE REPUBLISHED

## गणराज्योत्सवः

भारते पञ्चाशदधिकनवदशशततमे (१९५०) वर्षे प्रजाप्रभुत्वरीत्या प्रशासनम् आरब्धम्। प्रतिवर्षं जनवरि मासस्य २६ तमे दिनाङ्के गणराज्योत्सवः राष्ट्रियमहोत्सवरूपेण आचर्यते।

अस्मिन् दिने स्वतन्त्रभारतस्य नूतनसंविधानम् अनुष्ठानपथम् आगतम्। तस्य स्मरणार्थं सर्वे मिलित्वा आनन्देन उत्सवम् आचरन्ति। प्रतिराज्यं राजधान्यां बृहत् गणराज्योत्सवपथसञ्चलनम् आकर्षकतया प्रचलति।

विविधक्षेत्रेषु विशिष्टसेवां कृतवद्भ्यः गण्येभ्यः प्रशस्तिः प्रदीयते। सर्वत्र ध्वजारोहणं कृत्वा ध्वजवन्दनं सगौरवं कुर्वन्ति। अनेन सर्वेषां मनसि वयं सर्वे भारतीयाः इति भावना उत्पद्यते।

## पूरकपाठः - १

# त्यागाज्जगति पूज्यन्ते

संस्कृतसाहित्ये कथासाहित्यस्य वैशिष्ट्यम् अस्ति। यतः कथाद्वारा जीवननीतिं बोधयितुं शक्यते। पञ्चतन्त्रं हितोपदेशः कथासरित्सागरः इत्यादयः प्रख्याताः नीतिकथाग्रन्थाः वर्तन्ते। अत्र त्यागस्य महत्त्वबोधिका आधुनिकी कथा प्रदत्ता वर्तते।

कश्चन शिल्पी आसीत्। सः यां यां शिलां पश्यति स्म तया शिलया सुन्दरीं मूर्तिं निर्माय विक्रीणीते स्म।

एकदा सः काञ्चित् महतीं शिलां दृष्ट्वा - अहो एषा शिला अतीव उत्तमा अस्ति। एतया उत्तमं विग्रहं कर्तुं शक्नोमि इति चिन्तयित्वा तां शिलां खण्डयित्वा भागद्वयं कृतवान्। तयोः एकं भागं स्वीकृत्य तत्र विग्रहनिर्माणे उद्युक्तः अभवत्।

परं सः शिलाभागः शिल्पिनः प्रहारं न सहते स्म। ततः दूरं गन्तुं प्रयत्नं करोति स्म। शिल्पी बहुधा प्रयत्नं कृतवान्। अन्ते च निराशः



@KTBS NOT TO BE REPUBLISHED

भूत्वा सः तं परित्यज्य अन्यं भागं स्वीकृतवान् । महता परिश्रमेण विग्रह निर्माणकार्यं कृतवान् । अनेकानि दिनानि गतानि। तस्यां शिलायां सुन्दरः गणेशविग्रहः निर्मितः।

स च गणेशविग्रहः देवालये प्रतिष्ठापितः अभवत्। पूर्वं विग्रहं कर्तुं तेन या शिला उपयुक्ता सा देवालयस्य बहिर्भागे निपतिता आसीत्। जनाः ताम् अन्तः आनीय नारिकेलफलस्य भञ्जनार्थं तस्याः उपयोगं कुर्वन्ति स्म।

एकदा सा शिला देवालये मूर्तिरूपेण स्थितां शिलाम् अवदत् - ''भवती एव भाग्यशालिनी। केभ्यश्चित् दिनेभ्यः पूर्वम् आवाम् अपि एकस्याः एव महाशिलायाः भागभूते आस्व परं भवती अधुना देवालयस्य अन्तः मूर्तिरूपेण विलसति। प्रतिदिनं भवत्याः एव अभिषेकः भवति। हाराः अपि भवत्याः कण्ठे विराजन्ते। परं मम गतिः ईदृशी। प्रातः एव मदुपरि नारिकेलभञ्जनम् आरभन्ते जनाः। एतां वेदनाम् अनुभवन्ती अतिकष्टेन अहं दिनं यापयामि'' इति।

तदा मूर्तिरूपेण स्थिता शिला अवदत् - ''सखि! शिल्पी पूर्वं मूर्तिं कर्तुं भवतीमेव गृहीतवान्। तद्दिने तस्य प्रहारम् भवती असहमाना इति निश्चित्य स शिल्पी भवतीं परित्यज्य मां गृहीतवान्। अहं तु वेदनां सहमाना तितिक्षया तूष्णीम् अतिष्ठम्। ताः वेदनाः मम हिताय एव इति अचिन्तयम्। अतः अधुना एतादृशम् अदृष्टं प्राप्तम्। मम त्यागस्य फलमेतत्'' इति।

तस्याः वचनं श्रुत्वा सा शिला ज्ञातवती यत् जीवने तादृशम् अदृष्टं प्राप्तव्यं चेत् तदर्थं कश्चन त्यागः करणीयः एव भवति इति। स्वस्य मूर्खतायाः विषये सा लज्जिता अभवत् ।

**स्वाधिगमपरीक्षणं स्वतः कुरुत**

१. गणेशविग्रहः शिल्पिना कया निर्मितः ?

२. कस्मात् जगति पूज्यन्ते ?

*****

NOT TO BE REPUBLISHED ©KTBS

# परिशिष्टम्

## चित्रकथा

### शाला



@KTBS NOT TO BE REPUBLISHED

✻ चित्रं दृष्ट्वा वाक्यानि रचयत ।

# दीपावलिः



* चित्रं दृष्ट्वा वाक्यानि रचयत ।

©KTBS NOT TO BE REPUBLISHED

## गद्यावगाहनम्

महाभारतस्य कर्ता वेदव्यासः। महाभारते अष्टादशपर्वाणि सन्ति। एकोत्तरशतं कौरवाः पञ्चपाण्डवाः प्रसिद्धाः। पाण्डवानां पिता पाण्डुमहाराजः आसीत्। कुन्ती पाण्डवानां माता आसीत्। कौरवाणां जनकः धृतराष्ट्रः हस्तिनापुरस्य चक्रवर्ती आसीत्।

**अभ्यासः**

१. महाभारतस्य कर्ता कः?

२. महाभारते कति पर्वाणि सन्ति?

३. पाण्डवानां पिता कः?

४. धृतराष्ट्रः केषां जनकः?

*****

@KTBS NOT TO BE REPUBLISHED

आञ्जनेयः श्रीरामस्य भक्तः आसीत्। रावणः एकदा सीतायाः अपहरणं कृतवान्। तदा आञ्जनेयः सीतायाः अन्वेषणं कृतवान्। श्रीरामेण दत्तम् अङ्गुलीयकं सीतायै दत्तवान्। तदा सीता अतीव सन्तुष्टा। आञ्जनेयस्य मारुतिः इति नामान्तरमपि अस्ति।

**अभ्यासः**

१. आञ्जनेयः कस्य भक्तः आसीत्?

२. एकदा रावणः कस्याः अपहरणं कृतवान्?

३. आञ्जनेयः सीतायै किं दत्तवान्?

४. आञ्जनेयस्य किं नामान्तरम् अस्ति?

*****

# पदकोषः

| | | |
|---|---|---|
| अङ्गारः | ಕೆಂಡ | Charcoal |
| अपदः | ಕಾಲಿಲ್ಲದ | feet less |
| अर्बुदरोगः | ಅರ್ಬುದರೋಗ | Cancer |
| अभ्यासः | ರೂಢಿ | practice, exercise |
| अमुखः | ಬಾಯಿಲ್ಲದ | mouthless |
| असहिष्णुता | ಅಸಹನೆ | intolerance |
| अहिंसा | ಅಹಿಂಸೆ | non-injury |
| अवगम्यते | ತಿಳಿಯಲ್ಪಡುತ್ತದೆ | being known |
| आत्मवत् एव | ತನ್ನಂತೆಯೇ | like oneself |
| आक्रान्तम् | ಆವರಿಸಲ್ಪಟ್ಟಿತ್ತು | filled |
| आविष्काराः | ಹೊಸದಾಗಿ ಕಂಡುಹಿಡಿದ | inventions |
| आसन्दः | ಆಸನ | chair |
| आहर | ತೆಗೆದುಕೊಂಡುಬಾ | bring |
| इन्द्रियनिग्रहः | ಇಂದ್ರಿಯಗಳ ನಿಯಂತ್ರಣ | control of sencess |
| उक्तिः | ಮಾತು, ವಚನ | saying, statement |
| ऊर्मिः | ಅಲೆ, ತರಂಗ, | wave |
| ऊर्मिका | ಉಂಗುರ | finger-ring |
| कटु | ಒರಟು, ಖಾರ | harsh, hot |
| कामधुक् | ದೇವಹಸು, ಕಾಮಧೇನು | divine cow, |
| किरातः | ಬೇಟೆಗಾರ | hunter |
| कुल्याः | ಕಾಲುವೆಯ | of a canal |
| कृषीवलः | ರೈತ | farmer |
| कियत् | ಎಷ್ಟು | how much |
| चक्रयुक्तः आसन्दः | ಗಾಲಿಕುರ್ಚಿ | wheel chair |

NOT TO BE REPUBLISHED @KTBS

| | | |
|---|---|---|
| चिकित्सकः | ವೈದ್ಯ | doctor |
| जिह्वा | ನಾಲಿಗೆ | tongue |
| जेत्री | ಗೆದ್ದವಳು | victorious (f) |
| दमः | ಸಂಯಮ | control of the mind |
| दया | ಕರುಣೆ | compassion |
| द्विजिह्वा | ಎರಡು ನಾಲಿಗೆಯುಳ್ಳ | two tongued |
| ध्वनिपेटिका | ಧ್ವನಿ ಪೆಟ್ಟಿಗೆ | sound box |
| निःशुल्कम् | ಶುಲ್ಕವಿಲ್ಲದೆ | without fee |
| निःशुल्कम् | ಉಚಿತವಾಗಿ | ree of cost |
| पथिकः | ದಾರಿಹೋಕ | traveller |
| परः | ವೈರಿ, ದೂರ, ಅನ್ಯ | enemy, far, other |
| पृष्ठरज्जुः | ಬೆನ್ನುಹುರಿ | Spinal cord |
| प्रकोष्ठः | ಕೋಣೆ | room |
| प्रचोदिता | ಪ್ರಚೋದಿಸಲ್ಪಟ್ಟ | motivated |
| प्रहर | ಹೊಡಿ | beat |
| परिपाल्य | ಪರಿಪಾಲಿಸಿ | having followed |
| भित्त्वा | ಸಿಗಿದು, ಕತ್ತರಿಸಿ | having slit |
| मार्जारी | ಹೆಣ್ಣುಬೆಕ್ಕು | female cat |
| मातुलः | ಸೋದರಮಾವ | maternal uncle |
| मित्रता | ಗೆಳೆತನ | friendship |
| योगदानम् | ಕೊಡುಗೆ | contribution |
| रूप्यकम् | ರುಪಾಯಿ | rupee |
| लज्जा | ನಾಚಿಕೆ | sense of shame |
| लोभः | ದುರಾಸೆ | greed |
| वचः | ಮಾತು | speech |
| वत्सः | ಮಗು, ಕರು | child, calf |

©KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| वर्तुलाकारम् | ಗೋಳಾಕಾರ | circular |
| वैरूप्यम् | ವಿರೂಪತೆ | disfigurement |
| विक्रेतुम् | ಮಾರಲು | to sell |
| वह्निः | ಬೆಂಕಿ | fire |
| वाताटः | ಗಾಳಿಪಟ | kite |
| वित्तम् | ಹಣ, ಧನ | wealth |
| विपणिः | ಅಂಗಡಿ | shop |
| शीतः | ತಂಪು | cool |
| शुष्कः | ಒಣಗಿದ | dried |
| शोकम् | ಶೋಕಿಸುವುದು | feel sad |
| शोभा | ಕಾಂತಿ, ಕಳೆ | splendour |
| शल्यचिकित्सा | ಶಸ್ತ್ರಚಿಕಿತ್ಸೆ | surgery |
| श्लाघनीयम् | ಪ್ರಶಂಸಾರ್ಹ | praiseworthy |
| सौनिकः | ಕಟುಕ | butcher |
| सर्पिणी | **ಹೆಣ್ಣುಹಾವು** | female snake |
| सम्भूय | ಒಟ್ಟಿಗೆ ಸೇರಿ | having united |
| स्यूतः | ಚೀಲ | bag |
| स्रुतम् | ಸೋರಿದ, ಸುರಿದ | Oozing, exuding |
| सहवासः | ಸಹವಾಸ | company |
| संहर | ಕೊಲ್ಲು | kill |
| समृद्धः | ಸಮೃದ್ಧವಾದ | prosperous |
| हिंस्रम् | ಕ್ರೂರ | cruel |
| क्षुधा | ಹಸಿವು | hunger |
| श्रान्तः | ಆಯಾಸಗೊಂಡ | exhausted |

NOT TO BE REPUBLISHED
© KTBS

# आकरग्रन्थाः

१. डा. विश्वासः - पञ्चतन्त्रकथाः, संस्कृतभारती, बेङ्गलूरु अष्टमं मुद्रणम्-२०१०, ISBN 978-81, 88220-22-1, पुट ७२-७७.

२. च.मू. कृष्णशास्त्री - परिवर्तनम्, संस्कृतभारती, बेङ्गलूरु, प्रथम मुद्रणम् २००३. ISBN 81-88220 - 44 - 2 पुट ३२-३४.

३. जि. महाबलेश्वरभट्टः - सन्धिः समासः । संस्कृतभारती बेङ्गलूरु -२०१० ISBN 978-81-88220-19-1

1. ದುರ್ಗಸಿಂಹ ಪಂಚತಂತ್ರಮ್

2. ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥ ಶರ್ಮ ಅಮರಸಿಂಹನ 'ನಾಮಲಿಂಗಾನು ಶಾಸನಮ್' ಅಥವಾ ಅಮರಕೋಶ, ಕಾವ್ಯಾಲಯ, ಪ್ರಕಾಶಕರು, ಜಯನಗರ, ಮೈಸೂರು, ಮೊದಲ ಮುದ್ರಣ 1975.

1. Timmannachar G.K., Kalidasa's Abhijanana Shakuntalam, Bangalore Press, Bangalore, 1935.

2. Pride of India, Samskrit Bharathi, New Delhi 2006 ISBN 81-87276-27-4.

3. APTE V.S. Samskrit - English Dictonary, Motilal Banarasidas, New Delhi.

@KTBS
NOT TO BE REPUBLISHED